ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. X Oct,2017 - Mar,2018 No.2

वर्षम् – १०, अक्टूबर २०१७ – मार्च २०१८, अङ्कः – द्वितीयः

# प्राचीसुधा

# PRACI SUDHA

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

डॉ.विश्वनाथस्वाईं

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

PURI, ODISHA

डॉ० रमेश चन्द्र शुक्ल असि० प्रो० श्री गोमती नाथ संस्कृत महावि० बेलवा

Scanned with CamScanner

# प्राचीसुधा

## नियमावली

क) लेखकाः कर्गजपत्रस्य एकस्मिन् पार्श्वे लेखान् लिखित्वा प्रेषयेयुः ।
ख) प्रकाशयितव्यलेखानां निर्णये सम्पादकानामधिकारः निर्विवादः ।
ग) लेखककर्तृकलेखगतविषयविन्यासे सम्पादकोऽनाक्षिप्यः ।
घ) वार्षिकशुल्कम् – Rs. 60/-
ङ) प्रतिसंख्यम् – Rs. 30/-
च) आजीवनशुल्कम् – Rs. 1000/-


## पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठान-परिचालनासमितिः

| | | |
|---|---|---|
| सभापतिः | – | प्रो.अलेखचन्द्रषड़ङ्गी (कुलपतिचरः) |
| उपसभापतिः | – | प्रो.अद्वैतचरणधलः |
| महासचिवः | – | डॉ.विश्वनाथस्वाईँ |
| कोषाध्यक्षः | – | प्रो.प्यारीमोहनपट्टनायकः |
| संघटकसचिवः | – | प्रो.सूर्यमणिरथः |
| सहायकसचिवः | – | प्रो.ललितकुमारसाहुः |
| सहायकसचिवः | – | डॉ.काह्नुचरणपण्डा |
| सदस्यः | – | प्रो.गङ्गाधरपण्डा (पूर्वकुलपतिः) |
| सदस्यः | – | प्रो.विन्ध्येश्वरप्रसादहिमांशुः |
| सदस्यः | – | प्रो.प्रभातरञ्जनमहापात्रः |
| सदस्यः | – | प्रो.हरेकृष्णमहापात्रः |
| सदस्यः | – | प्रो.व्रजकिशोरनायकः |
| सदस्यः | – | श्रीज्ञानेन्द्रत्रिपाठी |
| सदस्यः | – | श्रीदीनबन्धुयतिः |
| सदस्यः | – | डॉ.वसन्तकुमारमिश्रः |



**सम्पर्कसङ्केतः** – डॉ.विश्वनाथस्वाईँ, प्राचार्यः,
श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयः, पुरी – 752001,
दूरभाषः – 06752-250588, भ्राम्यभाषः– +91 7377



**Edited, Printed & Published by Dr. Biswanath Swain on behalf
Purusottam Research Academy of Indology, Puri, Odisha
at SRI NARAYAN PRESS, Bali Sahi, Puri - 1**


Scanned with CamScanner

PRACI SUDHA
AN INTERNATIONAL REFERRED HALF-YEARLY SANSKRIT RESEARCH JOURNAL
ISSN 2249 - 2313



पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्
Purusottam Research Academy of Indology
Sarvodaya Nagar, Puri - 752002 (Odisha)
E.mail: biswanathpuri@yahoo.com
Ph. 06752-250588
Pracisudha2013@gmail.com

**संरक्षकाः**

श्रीमहन्तः डॉ.वृन्दावनविहारिदासकाठियाबाबामहाराजः, सुखचरः कोलकाता
श्रीमहन्तः श्रीरामकृष्णदासमहाराजः, पुरी
श्रीमहन्तः श्रीश्रीनिवासदासमहाराजः, पुरी
त्रिदण्डी स्वामी भक्तिस्वरूपश्रीधरमहाराजः, पुरी

**परामर्शदातृमण्डलम्**

प्रो.अलेखचन्द्रषडङ्गी(पूर्वकुलपतिः), प्रो.अद्वैतचरणधलः,
प्रो.रघुनाथपण्डा, प्रो.गङ्गाधरपण्डा(पूर्वकुलपतिः),
प्रो.प्रफुल्लकुमारमिश्रः(पूर्वकुलपतिः), प्रो.चन्द्रशेखरमिश्रः,
प्रो.विन्ध्येश्वरप्रसादहिमांशुः, प्रो.ललितकुमारसाहुः, श्रीज्ञानेन्द्रत्रिपाठी,
डॉ.नरेशचन्द्रदाशः, प्रो.नागवरप्रसाद राव चन्द्रपाटी,
प्रो.व्रजकिशोरनायकः, प्रो.केशवचन्द्रदाशः

**समीक्षकाः**

महामहोपाध्यायः प्रो.सुधाकराचार्यत्रिपाठी, चौ.च.वि.वि., मेरठ (यू.पी.)
प्रो.विक्रमकुमारः, पञ्जावविश्वविद्यालयः, चण्डीगड़
प्रो.सरोजकौशलः, जयनारायणव्यासविश्वविद्यालयः, जोधपुर (राजस्थान)

**सम्पादकमण्डलम्**

प्रो.प्यारीमोहनपट्टनायकः, प्रो.हरेकृष्णमहापात्रः,
प्रो.सूर्यमणिरथः, डॉ.काह्नुचरणपण्डा,
प्रो.प्रभातरञ्जनमहापात्रः, डॉ.निर्मलापाणिग्राही,
डॉ.वसन्तकुमारमिश्रः, डॉ.युधिष्ठिरसाहुः,
डॉ.शत्रुघ्नपाणिग्राही, प्रो.विश्वनाथस्वाईं

**सम्पादकः सञ्चालकश्च**

प्रो.विश्वनाथस्वाईं

Scanned with CamScanner

# ज्योतिषशास्त्रे वनस्पतिप्रयोग:

डा. रमेशचन्द्रशुक्ल:

वनौषधिद्वारा ग्रहाणां शान्ति: पञ्चप्रकारेण कर्त्तुं शक्यते १-ग्रहौषधिस्नानविधि:, २- महौषधिधारणविधि:, ३- महौषधिदानविधि:, ४- ग्रहौषधिसि्चनविधि:, ५- ग्रहौषधिहवनविधि: अत: क्रमेण पथमं ग्रहौषधिस्नानविधि: व्याख्यायते ।

**१. ग्रहौषधिस्नानविधि:-**

**(क)** ग्राहैषधिस्नानविषये तु मुहूर्त्तचिन्तामणौ्क्तं वर्त्तते यत् लाजा (धान्यलावा), कुष्ठ: (कूठ:) बला (बरियार:) पियङ्ग: (टागुनं - फलिनि: - कुकुनि:) धन: (मुस्ता - मोथा) सिद्धार्था: (सर्षपा:) दारु: (हरिदादेवदारु:) पुङ्खा (शरपुङ्खा) लोध्र: एतेषां ग्रहौषधीनां गङ्गाजले व सामान्यजले पति दिवसेकश्चिद् वस्त्रे बन्धनं कृत्वा, पुटं मिश्रणं कृत्वा यदा स्नानं क्रियते तदा सर्वेषां ग्रहाणां शान्ति: भवति । ग्रन्थप्रमाणं यथा-

लाजाकुष्ठबलाप्रियङ्गु धनसिद्धार्थैर्निशादारुभि: ।
पुङ्खा लोधुयुतैर्जलैर्निगदितंस्नानं ग्रहोत्थाघहृत ।।
(मुहूर्तचिन्तामणि ग्र.गो.प्र.श्लो.१५/१/२)

मूहूर्तगणपतिग्रन्थे पृथक-पृथकग्रहाणां स्नानविधि: प्रदत्तं यथा-

**(ख) सूर्य:** - सूर्यप्रसन्नताकामनया एल: साठी मधु: स्वसखस: देवदारु: कुंकुम: मन: शिलाताम्रं कमलपुष्पमिश्रितजलेन स्नानं क्रियते तदा सूर्यग्रहस्य शान्ति भवति । श्लोकप्रमाणं यथा- एलाषष्ठीमधूशीरताम्रपुष्पाब्जकुंकुमै:
स्नानं मन: शिलादेवदारुभि: रवितुष्टये ।।

**चन्द्र:**– चन्द्रग्रहप्रसन्नतानिमित्तं पञ्चगव्य: दन्ति: कमल: शङ्ख स्फटिक: मुक्ताकुमुदयुक्तजलेन स्नानं क्रियते तदा चन्द्रग्रहणस्य शान्ति । प्रमाणं यथा-

पञ्चगव्येन दन्ताम्बुशङ्खस्फटिकमौक्तिकै: ।
कुमुदैर्विमिश्रितं स्नानं चन्द्रदोषानुपत्तये ।।

**भौम:** - भौमप्रसन्नतानिमित्तं हिंगविल्वफलं जटामासि: मौलश्रि: लालचन्दनं लालफलं एवं वरियारमिश्रितजलेन स्नानं क्रियते तदा भौमग्रहस्य शान्ति भवति । ग्रन्थप्रमाणं यथा-

हिंगुलविल्वफतलनीमांसीवकुलचंदनौ ।
रक्तपुष्पैर्बलामिश्र: स्नानं भौमात्तिनुत्तये ।।

**बुध:**- बुधप्रसन्नतानिमित्तं गोमयाक्षमुक्तागोरोचनमधुस्वर्णफलमूलयुक्तमिश्रित-जलद्वारास्नानं क्रियते तदा बुध ग्रहस्य शान्ति भवति ।

गोमयाक्षतमुक्ताभी रोचनामधुहेमभिः ।
फलमूलैर्युतं स्नानं बोधनार्तिविनाशनम् ।।

(बृ)हस्पतिः- गुरुप्रसन्नतानिमित्तं चमेलिपुष्पं कुसुमपुष्पं श्वेतसर्षपम् एवं केतकिपत्रजले (मि)श्रणं कृत्वा स्नानं क्रियते तदा बृहस्पतिग्रहस्य शान्ति भवति। ग्रन्थप्रमाणं यथा-

मालतीकुसुमैः श्वेतसर्षपक्षौद्रसंयुतैः ।
पल्लवैर्भदन्त्या च स्नायाद्गुरुमुदे तवः ।।

(शु)क्रः - शुक्रग्रहप्रसन्नतानिमित्तं मैनशिलाफलं वा मूलं कुङ्कुमजलेन मिश्रणं कृत्वा (स्)नानं क्रियते तदा शुक्रग्रहस्य शान्ति भवति । ग्रन्थप्रमाणं यथा-

फलामनः शिलामूलफलकुंकुमवारिभिः ।
स्नानं शुक्रकृतां बाधां नाशयत्वे भुभूजाम ।।

(श)निः - शनिग्रहप्रसन्नतानिमित्तं बरियारंः अंजनः तिलः लोध्रः सोफमिश्रितजलेन स्नानं क्रियते तदा शनिग्रहस्य शान्तिः भवति । ग्रन्थप्रमाणं यथा-

बलांजनैः कृष्णतिलैर्लोध्रेणमिश्रितेरपि
शतप्रुष्पान्वितैः स्नायान्मन्दबाधानुत्पत्तये ।।

राहुः - राहुप्रसन्नतानिमित्तं लोहबानतारपीनमुत्थरागजदन्तकस्तूरिमिश्रितजलेन स्नानं क्रियते तदा राहुजनितग्रहस्य शान्ति भवति ।

केतुः - केतु प्रसन्नतानिमित्तं लोहवानतारपीनमुत्थरगजदन्तकस्तूरिरक्तचन्दनछाग-मूत्रमिश्रित - जलेन स्नानं क्रियते तदा केतु ग्रहस्य शान्तिः भवति । (मुहूर्तपारिजातः - पृ. ५६) ।

**(ग) सर्वौषधिस्नानतृतीयविधिः** - समस्तग्रहजनितदोषनिवारणार्थलाजवन्तिकूट-खिरहटिकालकागनिवनसर्षपदेवदारुलोधशरपुंखजटामासिदारुहरिद्रखशशिलाजीवचन्दन-घोडाचम्पानगरमोथादिमिश्रितजलौषधिद्वारास्नानं क्रियते तदा सर्वेषां ग्रहाणां शान्तिः भवति ।

**(२) ग्रहौषधिधारणविधिः** - सूर्यग्रहः यदि अरिष्टकारकः चेत् बलपत्रं रविपुष्पयोगेवा रविवासरे उपचारपूर्वकं गुलावीतन्त्वे बन्धनं धारणं क्रियते वा स्वर्णकवचे पत्रमूलयोः धारण कियते तदा सूर्यग्रहस्य शान्तिः भवन्ति ।

चन्द्रः - चन्द्रवासरे (क्षीरिकः) खिरिनिवृक्षस्य मूलं वा पलाशवृक्षस्य मूलं श्वेतोर्णतन्त्वे बन्धनं कृत्वा गीवायां बाजुमध्ये धारणं कियते तदा चन्द्रग्रहस्य शान्तिः भवति ।

भौमः - अनन्तमूलस्य मूलं (जड) वा खदिरस्य मूलं नीत्वा रक्तन्त्वे बन्धनंकृत्वा स्वर्णस्य कवचे वा रक्तवस्त्रस्य कवचे धारणं कियते तदा भौमग्रहस्य शान्तिः भवन्ति ।

बुधः - विधारावृक्षस्य मूलं वा अपामार्ग (चिर्चिडः) वृक्षस्य मूलं रजतकवचे स्थितं

कृत्वा उपचारपूर्वकं हरिततन्त्वमाद्यमेन पुटीकृत्याभुजायां व ग्रीवायां धारणठ क्रियते तदा बुधग्रहस्य शान्तिः भवति ।

**बृहस्पतेः** - कदली वा उदुम्बर वृक्षस्य मूलं पीतवस्त्रे वा स्वर्णकवचे स्थापयित्वा उपचारपूर्वकं पीततन्त्वाधारेण बाहुमध्ये धारणं क्रियते तदा बृहस्पतिग्रहस्य शान्तिः भवति।

**शुकः** - सरपंखिवृक्षस्य मूलं श्वेततन्त्वाधारेण स्वर्णकवचे वा अल्पनीलवर्णस्य वस्त्रे बन्धनं कृत्वा उपचारपूर्वकं धारणं क्रियते तदा शुक्रग्रहस्य शान्तिः भवति । तथैव उदुम्बर वृक्षस्य मूलमपि श्वेतवस्त्रमाद्यमेन धारणं क्रियते तदापि शुक्रग्रहस्य शान्तिः भवति ।

**शान्तिः** - रक्तवर्णीयविछुवावृक्षस्य मूलं कृष्णवर्णीयतन्ते बन्धनं कृत्वा रांगा कवचे धृत्वा उपचारपूर्वकं भुजा वा ग्रीवायां धारणं कृत्वा शनिवासरे हनुमतस्य अराधना क्रियते तदा शनिग्रहस्य शान्तिः भवति ।

**राहुः** - श्वेतचन्दनवृक्षस्य मूलं "वा" अभावे श्वेतचन्दनवृक्षस्य काष्ठं नीलतन्त्वे बन्धनं कृत्वा लौहकवचे स्थाप्य बुधवासरे उपचारपूर्वकं धारणं क्रियते तदा राहुग्रहस्य शान्तिः भवति । तथैव कुशा मूलमपि उपचारपूर्वकं धारणं क्रियते तदाऽपि राहुग्रहस्य शान्ति भवति ।

**केतुः** - असगंधवृक्षस्य मूलं स्वल्पनीलतन्त्वे बन्धनं कृत्वा रजतकवचे गुरुवासरे उपचारपूर्वकं धारणं क्रियते तदा केतु ग्रहस्य शान्ति भवति । ग्रन्थप्रमाणं यथा-

त्रिशूलीं क्षीरिकामूलं गोजिह्वा वृद्धकारकम्
ब्रह्मयष्टिं सिंह पुच्छीं वाच्यालं चन्दनं सितम् ।
अश्वगन्धाक्रमात् सूर्यादद्याद् दोशेपशान्तये ।। (ज्योतिषतत्त्वम्)

अर्थात् त्रिशुली (विल्ववृक्षमूलम्) क्षीरिकः (खिरनिः) गोजिह्वः (मयूरशिखः) वृद्धकारकः (विधारः) ब्रह्मयष्टिः (भारङ्गी) सिंहपुच्छिः (चित्रपार्णिः) वाच्यालः श्वेतचन्दनम् अश्वगन्धवृक्षमूलं क्रमात् सूर्यादिग्रहाणां उपचारपूर्वकं धारणं क्रियते तदा शान्तिकारकः भवति तथा च यः वृक्षः यस्य भवति तस्य अधः साधुजनाः जपादिकुर्वन्तिचेत् तस्य शीघ्रमेव सिद्धिः भवति।

**३. ग्रहौषधिदानविधिः** - मुहूर्तगणपतिगोचरप्रकरणे चतुष्विंशद्श्लोकानुसारेण ये ग्रहाः ग्रहगोचरे अरिष्टाः तथाऽष्टवर्गे दुष्टाः तेऽपि दानजपपूजादिद्वारा-शुभफलदायकाः भवन्ति।

**सूर्यदानपदार्थौषधिः** - गोधूमगुडताम्रसुवर्णरक्तचन्दनमणिक्यरक्तवस्त्रवादिनां दानं सूर्यप्रसन्नार्थं ब्राह्मणं प्रदीयते । प्रमाणं यथा-

गोधूमान्नं गुडं ताम्रं काञ्चनं रक्तचन्दनम् ।
माणिक्यं रक्तवस्त्रं च गामार्काय निवेदयेत् ।।

Scanned with CamScanner

| | | | | | | |
|---|---|---|---|---|---|---|
| २०. | पूर्वाषाढः | जलम् | धनुः | गुरुः | वगुलः | जलवेतस |
| २१. | उत्तराषढः | विश्वेदेवः | धनुः/मकरः | शुक्र/शनिः | पनसः | कटहल |
| २२. | श्रवणः | विष्णुः | मकरः | शनिः | अर्कः | मदार |
| २३. | धनिष्ठः | वसुः | मकरः/कुम्भः | शनिः/शनिः | शमिः | छयोकर |
| २४. | शतभिषः | वरुणः | कुम्भः | शनिः | कदम्बः | कदम्बः |
| २५. | पूर्वाभाद्रपदः | अजैकपादः | कुम्भः/मीनस् | शनिः/वृ. | आम्रं | आम |
| २६. | उत्तराभाद्रपदः | अहिर्बुध्न्यः | मीनः | वृ. | निम्ब | नीम |
| २७. | रेवती | पूषा | मीनः | वृ. | मिधूकः | महुवा |

जन्मनक्षत्रवअक्षे एवं यस्य राशिस्वामिनः यस्य नक्षत्रस्य स्वामी भवन्ति । चेत् तस्य नक्षत्रस्य मूले जनाः जलेन सिञ्चनं कुर्वन्ति चेत् तद् - तद् सम्बन्धिग्रहस्य शान्ति भवति ।

**ग्रहौषधिनां हवनविधिः** - समिधानवविधं प्रोक्तं यस्योल्लेखः याज्ञवल्क्यस्मृतौ गरुडपुराणे च वर्तते तद् यथा-

क्रमेण अर्कः (मंदारः) पलाशः (छियूलः) खदिरः (खेर, कत्थः) अपामार्गः । (चिर्चिडा) पिप्पलः (पीपलः) उदुम्बरः (गूलरवृक्षः) शमी, दुर्वा, कुशादिसमिधद्वारा - यस्य ग्रहस्य शान्तिकामनया हवनं क्रियते तद्-तद् ग्रहस्य क्रमेण शान्तिः भवति ।

प्रमाणवाक्यं यथा- अर्कः पलाशः खदिरः अपामार्गोऽथविप्पलः ।
उदुम्बरः शमी दुर्वाः कुशाश्च समिधः क्रमात् ।।

एवं ग्रहनक्षत्रयोः वनौषधिवृक्षद्वारासंग्रहीतकाष्ठद्वारामानवाः हवनं कृत्वा ग्रहाणां शान्तिः कर्तु शक्यन्ते । सर्वं शास्त्रसम्मतं वर्तते । मन्मतेऽपि समुचितं वर्तते । यदि कोऽपि इत्थं विविधग्रन्थद्वारासंकलितविचारं पठित्वा किमपिलाभः प्राप्स्यन्ति चेत् स्वसंकलन-लेखनपरिश्रमं धन्यं मन्यामहे । पालनाद गुरुवाक्यानां देवब्राह्मणवन्दनात् ।
वेदादिश्रवणाद्वापि साधूनामपि भाषणात् ।।
मनः शुद्धेर्जपाद्दानाद्धोमाद्यरदर्शनात् ।
नो कुर्वन्ति ग्रहा पीडां दुष्टस्थानेस्थिनापि वे ।।(मुहूर्तगणपतिः)

।। इति शम् ।।

—o—

*अध्यापकः,*
*श्रीसोमनाथसंस्कृतयूनिवर्सिटीसंचालितसंस्कृतमहाविद्यालयः,*
*वेरावल, गुजरात*

Scanned with CamScanner

ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Peer Reviewed Sanskrit Research Journal

Vol. XI October, 2018- March, 2019 No. 2

वर्षम् - ११, अक्टूबर २०१८ - मार्च्च २०१९, अङ्कः - द्वितीयः

# प्राचीसुधा

# PRACI SUDHA

AN INTERNATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां विराभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

प्रो. विश्वनाथस्वाईं

सहयोगिसम्पादकाः

डॉ.युधिष्ठिरसाहु

डॉ.लक्ष्मीनारायणबेहेरा

डॉ. विघ्नेश्वरमिश्रः

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

SARVODAYA NAGAR, PURI - 752002, ODISHA

डॉ. रमेशचन्द्र बाबूलाल शुक्ल

Scanned with CamScanner

# प्राचीसुधा

## *PRACI SUDHA*

## नियमावली

क) लेखकाः कर्गजपत्रस्य एकस्मिन् पार्श्वे लेखान् लिखित्वा प्रेषयेयुः ।
ख) आकृति-देवप्रियाफण्टमाध्यमेन टङ्किताः प्रेषिताश्च लेखाः अपि स्वीकृताः भवेयुः ।
ग) प्रकाशयितव्यलेखानां निर्णये सम्पादकानमधिकारः निर्विवादः ।
घ) लेखककर्तृकलेखगतविषयविन्यासे सम्पादकोऽनाक्षिप्यः ।
ङ) वार्षिकशुल्कम् - Rs. 100/-
च) प्रतिसंख्यम् - Rs. 50/-
छ) आजीवनशुल्कम् - Rs. 1500/-


## पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठान- परिचालनासमितिः

| | |
|---|---|
| सभापतिः | - प्रो.अलेखचन्द्रषड़ङ्गी (कुलपतिचरः) |
| उपसभापतिः | - प्रो. अद्वैतचरणधलः |
| उपसभापतिः | - प्रो.गोपबन्धुमिश्रः (कुलपतिः) |
| महासचिवः | - प्रो.विश्वनाथस्वाईं (सेवानिवृत्तः प्राचार्यः) |
| कोषाध्यक्षः | - प्रो.प्यारीमोहनपट्टनायकः |
| संघटकसचिवः | - प्रो.सूर्यमणिरथः |
| सहायकसचिवः | - प्रो.ललितकुमारसाहुः |
| सहायकसचिवः | - डा.कान्हुचरणपण्डा (प्राचार्यचरः) |
| सदस्यः | - प्रो.गङ्गाधरपण्डा (कुलपतिचरः) |
| सदस्यः | - प्रो.विन्ध्येश्वरप्रसादहिमांशुः (प्राचार्यचरः) |
| सदस्यः | - प्रो.प्रभातरञ्जनमहापात्रः |
| सदस्यः | - प्रो.हरेकृष्णमहापात्रः (प्राचार्यः) |
| सदस्यः | - श्रीज्ञानेन्द्रत्रिपाठी |
| सदस्यः | - श्रीदीनबन्धुयतिः |
| सदस्यः | - डॉ.वसन्तकुमारमिश्रः |



सम्पर्कसङ्केतः - प्रो.विश्वनाथस्वाईं, (सेवानिवृत्तः प्राचार्यः)
सर्वोदयनगरम्, मङ्गलामन्दिरमार्गः, पुरी - 752002, ओडिशा
दूरभाषः - 06752-250588 , भ्राम्यभाषः - +91 9438134700



Edited, Printed & Published by Prof. Biswanath Swain on behalf of
Purusottam Research Academy of Indology, Puri, Odisha
at SRI NARAYAN PRESS, Puri, Odisha



Scanned with CamScanner

# ज्योतिषशास्त्रे वास्तुशास्त्रम्

डॉ.रमेशचन्द्र बि. शुक्लः

सूर्यादिग्रहनक्षत्रतारानिहारिकाणां बोधकशास्त्रं ज्योतिषशास्त्रम् अर्थात् - सूर्यादिनवग्रहाणामश्विन्यादिसप्तविंशतिनक्षत्राणां, ध्रुवादितारानिहारिकाणां च यस्मिन् शास्त्रे आधारः दृश्यते तत् शास्त्रं ज्योतिषशास्त्ररूपेण गृह्यते । अत इत्थमपि वक्तुं शक्यते यत् सूर्यादिग्रहरश्मिद्वारा निर्मितं शास्त्रं ज्योतिषशास्त्रमभिधीयते ज्योतिषशास्त्रे स्कन्धत्रयं विद्यते - (१) सिद्धान्तज्योतिषं (२) संहिताज्योतिषं, (३) होराज्योतिषं च । तेषां परिचयः अधः प्रदीयते ।

**(१) सिद्धान्तपक्षः** - त्रुटिकालतः प्रलयान्तं यावत् कालस्य कलनं - गणना तथा पञ्चाङ्गादिनिर्माणं सिद्धान्तपक्षतः एव भवति । ग्रहनयने अपि वृहद्लघु च द्वे विधी स्तः । त्रुट्यादितः यदग्रहज्ञानं तत् सिद्धान्तमुच्यते, शकदेर्यद्ग्रहज्ञानं तत् करणमुच्यते एवं युगोदेर्यदग्रहज्ञानं तत् तन्त्रं कथ्यते । सिद्धान्ते, करणे, तन्त्रपक्षे च ग्रहानयनपञ्चाङ्गादिनिर्माणस्य विधिः पूर्वतः त्रिविधं प्रचलितः आसीत् तैनाऽधारेण ग्रहनक्षतारानिहारिकाणाञ्चाऽनयनं क्रियते । निर्मितपञ्चाङ्गद्वाराजनानांमहदुपकारो भवति । जन्माङ्गादिनिर्माणेऽपि इदं मूलरूपेण आधारो भवति ।

**(२) संहितापक्षः** - गर्गसंहिता, नारदसंहिता, बृहस्पतिसंहिता, बृहत्ससंहितादि-विविधसंहिताग्रन्थाः सन्ति, एतेषु संहिताग्रन्थेष्वपिवास्तुविद्याध्यायाः सन्ति । पक्षेऽस्मिन् वास्तुविषयकविचारः उपस्थितो भवति ।

**(३) होरास्कन्धः** - जन्माङ्गनुसेरेण मानवस्य चराचरसृष्टिस्थितसमस्तजीवानां भावग्रहयोः संयोगेन शुभाशुभं विचार्यते इति होरास्कन्ध । इत्थं त्रिविधष्कन्धाः भवन्ति । अतः संहितापक्षीयवास्तुविचारः क्रियते -

वास्तुः वास्तुः वास्तुः तदा किन्नां वास्तु इति ? वस्तुं योग्यः वास्तुः या वासयोग्यभूमिः भवति सा वास्तुसंज्ञया गृह्यते तदावास्तुस्थितस्वरूपं विचार्यते । सिद्धान्ततत्वविवेकग्रन्थे वास्तुस्वरूपस्थितवर्णनं यथा दृश्यते-

प्रमाणवाक्यम् -

ब्रह्माण्डोदरमध्यगाऽवनिजलाऽग्न्यूर्ध्वेन्दुपूर्वग्रहार्क्षोस्थप्रब्रह्मान्तगोल-रचनासृष्टिर्यथावतस्थिता ।


कालेऽस्मिन्गहनेव्ययेऽस्तिसततं यस्मादियं तज्जयत्याद्यं निर्गुणमीशमव्ययपर-

ब्रह्मैकतत्वं शुभम् ।।

एतदनुसारं ब्रह्माण्डस्य मध्ये-उदरे, आदौ अवनी - पृथ्वी, ततो जलं, ततः अग्निः ऊर्ध्वक्रमेण ग्रहाश्च वर्तन्ते । तदत्र यथा -

आवृतोऽयं क्रमाच्चन्द्र बुधशुक्रार्कभुभूवाम्।
गोलैर्जीवार्किभानां च क्रमादोर्ध्वोर्ध्वसंस्थितैः ।।

अर्थात् ग्रहनक्षत्रकक्षाक्रमाः श्लोकेनानेनस्पष्टीभूताः । चक्रं यथा-



एतेषां जलाग्निग्रहनक्षत्रप्रवहादिवायुनां मध्ये यः तिष्ठति स एव पृथ्वी नाम्नाकथ्यते अस्यां पृथिव्यां यत् निवासयोग्यस्थानं भवति स एव वास्तुरूपेण गृह्यते । कारणं कस्मिंश्चिद्स्थाने भूमेरुपरि मानवदानवपशुपक्षिजीवजन्तूनामुचित-स्थानान्यावश्यकानि सन्ति अतः वास्तुशास्त्रस्यावश्यकता भवति । मानवाः बुद्धिमन्तः विचारवन्तः ज्ञानमूर्द्धन्याश्च भवन्ति एतस्मात् कारणात् मानवानां कृते वा मानवसमीपस्थितपशुपक्ष्यादिजीवानां कृते स्वाऽनुकूल वास्तुरपेक्ष्यते तदोत्तमस्थाने गृहस्य निर्माणमपेक्ष्यतो भविष्यपुराणे गृहस्यावश्यकताविषये विचारितं यथा-

गृहस्थस्य क्रियाः सर्वा न सिद्ध्यन्ति गृहं विना ।
यतस्तस्माद् गृहारम्भप्रवेशसमयौ ब्रुवे ।।
परगेहे कृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः ।
न सिद्ध्यन्ति यतस्तस्माद् भूमीशः फलमश्नुते ।।

गृहस्थस्य क्रियाः गृहं विना न सिद्ध्यन्ति, एतस्मात् कारणात् गृहारम्भ-प्रवेशासमयौ च ब्रुवे । कारणम् श्रौतकर्म - वेदप्रतिपाद्ययागादियज्ञोपवीतादिसर्वाः क्रियाः एवं स्मार्त - स्मृत्यादिशास्त्रेषु प्रतिपाद्यशुभफलकामनया यागानुष्ठानादिद्वारा च यानि फलान्युत्पद्यन्ते तद् गृहं विना न सिद्ध्यन्ति फलानि तानि भूमिस्वामिने लभन्ते एतस्मात् कारणात् सर्वेषां कृते गृहस्यावश्यकता भवति सामान्यतया भौतिकसुखकामनयाऽपि, मनुष्यैः संरक्षणकामनयाऽपि समाजे मानसम्मानकृतेऽपि गृहस्याऽवश्यकता भवति ।

आरोग्यगृहनिर्माणस्य अपरं वाक्यं यथा-

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्,
जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ॥

अनेनश्लोकेनापि आरोग्यस्थानस्य सिद्धयति । गृहनिर्माणे प्रयुज्यमानवस्तूनां फलमीदृशं यथा-

कियत्पुण्यकार्यं क्रियते तदा तस्य एकं पुण्यफलं भवति तथैव गृहनिर्माणे यदि तृणस्य गृहनिर्माणं क्रियते तर्हि तस्य कोटिगुणपरिमितं फलं लभ्यते मृण्मयगृहस्य निर्माणं क्रियते तदा दशकोटिगुणपरिमितं फलं लभ्यते इष्टिकाद्वारा गृहनिर्माणे शतकोटिगुणपरिमितं एवं प्रस्तरस्य गृहनिर्माणे अनन्तकोटिगुणपरिमिता पुण्यप्राप्तिर्भवति । ग्रन्थप्रमाणं यथा -

कोटिघ्नं तृणजे पुण्यं मृण्मये दशधागुणम् ।
ऐष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे ॥

इति गृहनिर्माणस्य फलं शास्त्रे निर्दिष्टमस्ति । अतः इत्थं गृहनिर्माणे फलदृष्ट्या वस्तूनां प्रयोगः क्रियते तदनुसारं पुण्यं जनाः प्राप्नुवन्ति । अतः कुत्र निवासः करणीयः कुत्र न करणीयम् इति विचारः क्रियते स्वनामराशिवशात् यथा - यस्य वृषमिथुनसिंहमकरराशिः स्यात् तदा तेषां कृते ग्रामस्य मध्ये गृहनिर्माणं शुभं न भवति । तथा वृश्चिकमीनकन्याकर्कधनुतुलामेषकुम्भराशिस्थितजनैः पूर्वादिदिक्क्रमेण वासः न करणीयः यथा - ग्रामस्य पूर्वकोणे वृश्चिकराशिः आग्नेयकोणे मीनराशिः, दक्षिणभागे कन्याराशिः, नैर्ऋत्यकोणे कर्कराशिः, पश्चिमे धनुराशिः, वायव्यां तुलाराशिः, उत्तरे मेषराशिः, ईशाने कुम्भराशिः । अतः लेखकस्य नामराशिः तुला अस्ति एतस्मात् कारणात् ग्रामस्य वायव्यां पश्चिमोत्तरदिशि वासः अमङ्गलप्रद इति, इत्थम् अन्यत्रापि विचारणीयम् -

ग्रन्थप्रमाणं यथा -

गोसिंहनक्रमिथुनं निवसेन्न मध्ये ग्रामस्य पूर्वककुभोऽलिझषाङ्गनाश्च ।
कर्कोधनुस्तुलभमेषघटाश्च तद्वद्वर्गाःस्वपञ्चमपरा बलिनः स्युरैन्द्र्याः ॥

वास्तुप्रदीपे यथा-

यदि गृहस्वामिनामराशितः यस्मिन् ग्रामे निवासः करणीयः अस्ति तद् २/५/९/१०/११ राशयः सन्ति तदा उत्तमम् । तथा १/३/४/७ राशयः सन्ति चेद् मध्यमम् एवं ६/८/१२ ग्रामराशिः चेत् अशुभं भवति अर्थात् तस्मिन् ग्रामे निवासः नेष्टः भविष्यति ।

प्रमाणं यथा-

यद्ग्रामभं द्व्यङ्कसुतेशदशस्थितं भवेल्लाभगतः शुभः सः ।

Scanned with CamScanner

यद्गं शशाङ्काम्निनगाब्धितुल्यं मध्योष्टपट्काकमितं निषिद्धम् ॥

इत्थमपि काकिणीविचारमप्यावश्यकमस्ति यथा-

स्ववर्गसंख्यायाः द्विगुणं कृत्वा ग्रामवर्गस्य योगः क्रियते तथैव ग्रामवर्ग संख्यायाः द्विगुणं कृत्वा स्ववर्गस्ययोगः क्रियते । उभयोः स्थाने अष्टभक्तं शेषौ काकिण्यौ भवतः यस्य काकिण्यधिका सः ऋणी भवेत् एवं यस्य काकिणीन्यूना सः तदस्थानात् लाभं प्राप्नोति ।

उदाहरणं यथा - लेखकस्य अ,क,च,ट,त,प,य,श वर्गेषु सप्तमे र वर्णः अस्ति । तथैव वैरावलस्थानस्य वर्गः सप्तम य वर्गो "वै" वर्णः अस्ति अतः "र" स्थाने वर्गसंख्या ७ एवं "वै" स्थाने वर्गसंख्या सप्त (७) वर्तते । अतः गणितक्रिया क्रियते यथा-

स्ववर्ग : र = ७ x२ =१४ + ७ =२१ / ८ =५ शेषः

ग्रामवर्ग : वै = ७ x२ =१४ + ७ =२१ / ८ =५ शेषः

अत उभयोः गणितक्रियायां लेखकस्य शेषसंख्या ५ एवं नगरस्य शेष संख्या ५ द्वावपि समानी । एतस्मात् कारणात् वैरावलनगरस्य काकिणीसमानी । अतः नगरस्य हानिः न लेखकस्य, नगरात् लाभमेव भवति एवं भूमिग्रहणकाले अन्यस्थानेष्वपिविचारणीयम् । कस्मिश्चिदपि ग्रामे लाभः भवति तत्र भूमिक्रयणं कृत्वा गृहनिर्माणं विधेयम् ।

भूमिपरीक्षणे आचार्यवराहमिहिरानुसारेण वर्णितः प्रसङ्गः उद्धाट्यते यथा-

आचार्यवराहेण चतुर्विधभूमिपरीक्षणं निर्देशितम् । तद्यथा - (१) गन्धविधिः (२) वर्णविधिः (३) रसविधिः (४) प्लवविधिः एते चत्वारो विधयः परीक्षणाय निर्दिष्टा सन्ति । तत्र गन्धविधिः - गन्धविषयेऽपि भेदाः सन्ति (१) ब्राह्मणः (२) क्षत्रियः (३) वैश्यः (४) शूद्रः इति चतुर्विधवर्णाः सन्ति गन्धमपि चतुर्विधं अस्ति यथा - (१) गन्धस्यपरीक्षा - (क) ब्राह्मणेभ्यः मधुगन्धः (ख) क्षत्रियेभ्यः मृतगन्धः (ग) वैश्येभ्यः अन्नगन्धः (घ) शूद्रेभ्यश्च रक्तगन्धयुक्ताभूमिः सुखदायिनी भवति।

(२) वर्णपरीक्षा - (क) ब्राह्मणेभ्यः श्वेतभूमिः (ख) क्षत्रियेभ्यः रक्तभूमिः (ग) वैश्येभ्यः पीतभूमिः (घ) शूद्रेभ्यः कृष्णभूमिः प्रशस्ता भवति ।

(३) रसपरीक्षा - (क) ब्राह्मणानां कृते मधुरसयुक्तभूमिः (ख) क्षत्रियाणां कृते कटु - - कटुवी (सर्वपतैलसदृशः) (ग) वैश्यानां तिक्तः (घ) शूद्राणां कृते कषायस्वादयुक्तभूमिः श्रेयस्करी भवति ।

(४) प्लवपरीक्षा - प्रथमं किन्नाम प्लवः बिचार्यते यस्यां दिशि जलं गच्छति सा भूमिः तद् दिग्प्लवा भवति अर्थात् भूमेर्यद्दिङ्नमत्वं तद्दिग्प्लवत्वं कथ्यते । (क) उत्तरप्लवभूमिः ब्राह्मणानां कृते प्रशस्या (ख) पूर्वप्लवभूमिः क्षत्रियाणां कृते श्रेयस्करी (ग) दक्षिणप्लभूमिः वैश्यानां कृते शुभङ्करी (घ) पश्चिमप्लवभूमिश्च शूद्राणां कृते सुख दायिनी भवति ।

Scanned with CamScanner

भूमिपरीक्षणे वराहस्यवचनं यथा-

क्षेत्रमब्दौ परीक्षेत गन्धवर्णरसप्लवैः
सुमध्वाज्यान्नपिशितं गन्धं विप्रानुपूर्वकम् ।
सितेष्वदक्तहारिद्रकृष्णावर्णा यथाक्रमात्
मधुरं कटुकं तिक्तं काषायरससन्निभम् ।।

एवं चतुर्विधवर्णानां कृते सामूहिकशुभादिग्प्लवत्वं विचार्यते यथा -

सामूहिकचतुर्विधवर्णानां उत्तरैशानपूर्वदिग्प्लवभूमिः चतुर्विधवर्णानां कृते वृद्धिकारिणी शुभकारिणी च भवति एवं अन्यदिग्प्लभूमिः सामूहिकदृष्ट्या हानिकारिणी भवति ग्रन्थप्रमाणं यथा-

अत्यन्तं वृद्धिदं नृणामीशानप्रागुदक्प्लवम् ।
अन्यादिक्षु प्लवं तेषां शस्यदत्यन्त्यहानिदम् ।।

एवं भूमिपरीक्षणे अन्यप्रकारः यथा - भवननिर्माणकामनया यथानिर्दिष्ट-स्थानोपरि एक हस्तात्मकं दीर्घं विस्तृतञ्च गर्तं खनित्वा शायङ्काले जलं पूरयित्वा प्रातर्दृष्टे जलम् अस्ति चेद् वृद्धिः, पङ्कः (कीचडम्) अस्ति चेद् समा, व्रणम् (दरार) अस्ति चेद् क्षयं - अधमः (निषिद्धम्) भूमिर्भवति तदा भूमिरियं वासयोग्या न भवति । ग्रन्थप्रमाणं यथा-

तत्रारत्निमितं गर्तं खनित्वाऽन्तः प्रपूरयेत् ।
प्रातर्दृष्टे जले वृद्धिः समं पङ्के व्रणे क्षयः ।।

एवं वराहसंहितायां प्रकारान्तरेण भूमिपरीक्षणं यथा - भूमौ विष्णुकान्ता, जया, जयन्ती, जीवित्पुत्रादिलता एवं याज्ञिकवृक्षाः प्रसन्नमुद्रायां दृश्यन्ते तथा उच्चनीच्चविषमभूमिः मूषकादिविलस्फुटितादिदोषरहिता तथा मधुरस्वादसुगन्धप्रसन्नोन्मुखाभूमिः किञ्चित्कालस्थितमात्रेण श्रमजनितदोषं शामयति तथा अतिशयानन्दशान्त्यनुभूतिदाभिर्भवति सा भूमिः वासयोग्या आचार्यैः कल्पितम्।

ग्रन्थप्रमाणम् -

शस्तौषधिद्रुमलता मधुरा सुगन्ध स्निग्धा समा न सुषिराथ मही नराणाम्।
अप्यध्वनि श्रमविनोदमुपागतानां धत्ते श्रियं किमुत शाश्वतमन्दिरेषु ।।

यद्यपि बहुप्रयुक्तविचारास्सन्ति परन्तु संक्षेपेण ज्योतिषशास्त्रे वास्तुशास्त्रस्य सारतत्वं यथामति कल्पितम् । यदि कश्चित् जनः अध्ययने, अध्यापने, व्यवहारे गृहभूमिचयने च लेखेनानेन साफल्यं प्राप्नोति तर्हि स्वचिन्तनं धन्यं मन्ये । इति ।

**ज्योतिषशास्त्रविभागाध्यक्षः, वेदवेदाङ्गसङ्कायाध्यक्षश्च ।**
**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गुजरातराज्यम् ।**

Scanned with CamScanner